This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाखल अंक	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
M-2574	कर्मभंग	–	मंत्र	अपूर्ण	–	3/6	10	संस्कृत	कागद	11	37		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ श्रीरुक्मिणीपांडुरंगं प्रणम्य पितरौ गुरून् तृतीयच्छेदोत्तरार्धं तनोमि
श्रीशतुष्टये॥१॥ श्रीनाथः करुणासिंधुरिंदिराशंकरः सती॥ विघ्नेशो भास्करेंद्राद्या विघ्ना
न्घ्नंतु सदैव मे॥२॥ तत्रतावच्छ्राद्धादिनिर्णयं वक्तुमधिकारनिर्णयाय जीवत्पितृकाधिका
रो विविच्यते पादुकेचोत्तरीयं च तर्जन्यां रूप्यधारणं। नजीवत्पितृकः कुर्यात् ज्येष्ठभ्रातरि
जीवति। अत्र पादुके काष्ठमय्यौ। उत्तरीयं सग्रंथिपरिमंडलं वस्त्रमेकच्छंगुलादिविस्तृतं स
त्रकृतं परिमंडलरूपं वा उत्तरीयस्थाने पट्टं स्मृत्युक्तं तृतीययज्ञोपवीतं वा जीवत्पितृकेण जी
वज्ज्येष्ठभ्रातृकेण च न धार्यमिति तात्पर्यं प्रावाररूपं द्वितीयवस्त्रं तु जीवत्पितृकादिभिः सर्वै
र्धार्यं। एकवस्त्रो न भुंजीत न कुर्याद्देवतार्चनमित्यादिना सर्वकर्मस्वेकवस्त्रत्वनिषेधात् पितरि
पितामहे ज्येष्ठभ्रातरि चाहिताग्नौ जीवति पुत्रपौत्रकनिष्ठभ्रातृभिराधानं न कार्यं ज्येष्ठभ्रातर्य
कृतविवाहे कनिष्ठेन विवाहो न कार्यः अत्र विशेषः पूर्वार्धे उक्तः एवं पित्रादिष्वकृतसोमयागेषु
जीवत्सु पुत्रादेः सोमे नाधिकारः एवं संन्यासोपि कनिष्ठस्य सोदरस्यैव निषेधो न भिन्नोदरस्य भ्रातुः।

धर्मसिं०सा०
१

पित्रादेशाज्ञायां पुत्रादेर्न दोष इति केचित्। अधिकारिणि पितरि सत्याज्ञायामपि दोषः। पातित्य ॥३॥
जात्यंधत्वादिदोषैरनधिकारिण्याज्ञया न दोषः। पातित्यादौ आज्ञां विना पि न दोष इत्यपरे। तथा
जीवत्पितृकस्य पितृ लस्येषु दर्शादि श्राद्धतर्पणपैतृकहोमेषु नाधिकारः। अत्र विशेषः। स्वापत्य
संस्कारे स्वद्वितीयविवाहाग्निनिमित्तकनांदीश्राद्धे चातुर्मास्यांतर्गतपितृयज्ञे सोमांगतृतीयस
वनस्थपितृयज्ञे जीवत्पितुरधिकारः। पिंडपितृयज्ञे होमांतः पिंडपितृयज्ञो नारंभो वा पिंडपितृ
यज्ञस्येति पक्षद्वयं पितुः पित्राद्युद्देशेन पिंडदानमिति तृतीयः पक्षः क्वचित्। एवमष्टकादिविकृति
ष्वपि पक्षत्रयं॥ गयां प्रसंगतो गत्वा मातुः श्राद्धं सुतश्चरेत्। जीवत्पिता मातुः श्राद्धमुद्दिश्य ग
यां न गच्छेत्। महानदीषु सर्वासु तीर्थे च मासे जीवत्पितृकः पितुः पितृमात्राद्युद्देशेन श्राद्धं कुर्यात्।
न वध्यामन्वष्टका श्राद्धं क्षयाहे मातुः प्रत्यब्दश्राद्धं च सपिंडकमेव जीवत्पितृकः कुर्यात्। तथा सं
न्यस्तेतातेपतितेचताते जीवत्यपि सति दर्शश्राद्धमहालयसंक्रांतिग्रहणादिश्राद्धानि सर्वाणि
पितुः पित्राद्युद्देशेन जीवत्पितृकेण कार्याणि। एतानि च सांकल्पिकविधिना पिंडरहितानि कार्याणि। अ १
न्वष्टक्यादाविव पिंडदाने विशेषः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३श्रा

वचनाभावात्। आश्विनशुक्लप्रतिपदि दौहित्रो जीवत्पितृकः सपिंडकं मातामहश्राद्धं कुर्यात्।
तथा भ्रातृपुत्रोऽपुत्रस्य पितृव्यस्य प्रत्यब्दश्राद्धं सपिंडकं कुर्यात्। एवं कनिष्ठभ्रातोऽप्यपुत्रज्ये
ष्ठभ्रातुः प्रत्यब्दं। तथा स्वपत्नीपुत्रः सापत्नमातुःर्धं। एवं दौहित्रोऽपुत्रस्य मातामहस्य प्रत्यब्दं।
इत्थं च पितृव्यादिश्राद्धचतुष्टये जीवत्पितृकस्याप्यधिकारः। पितृव्यभ्रात्रादीनामपुत्राणां प
त्नीसत्वे सैवाधिकारिणी न तु भ्रातृपुत्रादेः श्राद्धाधिकारः। एवं पतिरेवापुत्राभावे भार्याश्राद्धं कु
र्यात्। सपत्नीपुत्रसत्वे तु स एव कुर्यान्न भर्ता दौहित्रभ्रातृपुत्रयोः सत्वेऽपि तस्य विभक्तत्वे दौहित्र एव।
अविभक्तत्वे भ्रातृपुत्रः। केचित्तु भ्रातृतत्सुतत्पुत्रयोः सत्वे भ्रात्रैव श्राद्धं कार्यमित्याहुः। तथा
जीवत्पितृकस्य पितृपितामहादिमनुष्यपितृतर्पणनिषेधेऽप्यग्निष्वात्तादिदेवपितृतर्पणनिषे
धाभावात्स्नानांगपितृतर्पणे ब्रह्मयज्ञांगभूते देवरूपिपितृतर्पणे चाधिकारोऽस्त्येव। एवं य
दीयश्राद्धेऽधिकारस्तदीयश्राद्धांगतर्पणेऽप्यधिकारः। जीवत्पितापि कुर्वीत तत्तर्पणं यमभीष्मयोः
श्राद्धांगभिन्नतर्पणं जीवत्पितृकेण तिलैर्न कार्यं श्राद्धप्रयोगमध्ये यामजा...न्वभावो नीवीबंधश्च न का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ यः।न्क्याहेस्नात्वातर्पणांत्तेसमंत्रकंवस्त्रनिष्पीडनंविहितंतन्नकार्यं।तथाखड्गमौक्तिकहस्तेनक
र्तव्यंपितृतर्पणमितिविहितंखड्गधारणंनकार्यं।अपसव्यंद्विजाग्र्याणांपित्र्येकर्मणिकी
३त र्तितं।आम्रकोष्ठात्तुकर्तव्यमेतत्त्रिष्विजीवति।संन्यस्तादिरूपेपितृश्मसृत्तमातृमातामहके।
पिपुत्रःपितुःपितृपितामहप्रपितामहानां।पितुर्मातृपितामहीप्रपितामहीनां।पितुर्मातामह
हमातुःपितामहमातुःप्रपितामहानां।मितिपार्वणत्रयमेकोद्दिष्टगणंचस्वमातरंपितुःपत्न्याः
इतिस्वपितृव्यंपितुर्भ्रातुरितिस्वमातामहंचपितुःश्वशुरस्येत्येवमुदिना।पितृसंबंधपुरस्कारे
णैवोद्दिश्यमहालयश्राद्धंकुर्यात्।एवंदशोद्दिष्टं।पितुःसंन्यासोभावेपितृतीर्थश्राद्धंजीव
त्पितुरेवमेव।एवंवृद्धिश्राद्धेप्रत्यब्दंब्रह्मयज्ञांतेनित्यंपितृतर्पणमपिसंन्यस्तादिरूपजीवत्पि
तृकेणैवमेवकार्यमित्याहुः।यदातुमातुर्वार्षिकमपुत्रमातामहवार्षिकमपुत्रपितृव्यवार्षिकंवा
क्रियतेतदाक्रमः।मातृपितामहीप्रपितामहीनांमातामहमातृपितामहमातृप्रपितामहानां
पितृव्यपितामहप्रपितामहानां।मित्येवोद्देशः।यदाचपित्रादिभिःस्वाशक्त्यादिनानियोजितःपि २

श्रादिकरणीयंश्राद्धंस्वयंपित्रादेः प्रतिनिधिभूतंकरोतितदापितुरमुकशर्मणोयजमानस्यपितृपिताम
हप्रपितामहानांइत्येवंयथाश्राद्धमुद्देशः। सर्वत्रपितृहस्तेभ्रातृष्वविभक्तेषुज्येष्ठस्यैवाधिकारः। वि
भक्तेषुपृथक्पृथक्। सापत्नभ्रातरिज्येष्ठेसत्यपिकनिष्ठएवस्वमातृवार्षिकान्वष्टक्यादिकुर्यात्।
जीवत्पितृपितामहकस्यसंन्यस्तपितृपितामहकस्यचप्रपितामहस्यपित्राद्युद्देशेनवृद्धिश्राद्धंतीर्थ
श्राद्धंदर्शादिश्राद्धंभवति। पित्रादिषुजीवत्सुसत्सुसंन्यस्तेषुनकिमपिश्राद्धंकार्यं। केचित्तुपित्रादि
त्रयात्परेभ्यः श्राद्धंदेयमाहुः मृते पितरि पितामहजीवने पित्रे पितामहात्पराभ्यांश्राद्धंदेयं। ए
वंपितृपितामहमरणेप्रपितामहजीवनेप्यूह्यं। यस्तुगृह्याग्निमान्जीवन्मातृपितृकः पितुः पि
त्रादिभ्यः पिंडदानमितितृतीयपक्षाश्रयेणारब्धपिंडपितृयज्ञाष्टकान्व ष्टकाश्राद्धोन्वष्टका
यांचपितुः पित्रादिमात्रादिमातामहादिभ्यः पिंडादिकंदद्यादनंतरंचमातामहत्तासोन्वष्टकायां
स्वमात्रादिभ्यः पितुःपित्रादिभ्यश्चदद्यात्। यदाचपिंडपितृयज्ञान्वष्टकाद्यनारंभपक्षोजीवत्पि
तृकस्यतदापिसंन्यस्तादिपितृकस्यदर्शादिश्राद्धंपित्राद्युद्देशेनव्युतिषंगभिन्नप्रयोगेणसांक
ल्पिकेनभवत्येव पितुरविभक्तैःपुत्रैःपृथक्वैश्वदेवोनकार्यः पितृपाकोपजीवीस्यात्भ्रातृपाको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृजीवकरस्युक्तेः। अत्तएवगृह्याग्नौपाकवैश्वदेवकरणपक्षेपिसाग्निकेपितरिसाग्निकैरप्यविभक्तैः
पुत्रैःपृथग्वैश्वदेवोनकार्यः।येषांपाकाभावेग्नेर्लौकिकत्वंमतंतैःपाकमात्रमग्निसंस्कारार्थंकार्य
मितिभाति विभक्तैस्तुपृथग्वैश्वदेवःकार्यःतत्रवैश्वदेवस्यदेवयज्ञभूतयज्ञपितृयज्ञात्मकत्वाज्जी
वत्पितृकैरपिपंचमहायज्ञांतर्गतःपितृयज्ञःकार्यः वैश्वदेवाद्भित्राःपंचमहायज्ञास्तैत्तिरीयाणां
तैरपिविभक्तैर्जीवत्पितृकैःपितृयज्ञः कार्यः।तस्यदेवरूपीपितृदेवताकत्वेनपितृपितामहादि
मनुष्यरूपिपितृदेवताकत्वाभावात्॥मुंडनंपिंडदानंचप्रेतकर्मचसर्वशः॥नजीवत्पितृकःकु
र्याद्गुर्विणीपतिरेवच अत्रमुंडनंक्षुरेणशिरसोवपनं तेनकर्तनंसिद्ध्यति सर्वप्रेतकर्मप्रेत
दहनंसपिंडीकरणांतौर्ध्वदैहिकादिकमित्यर्थः मुंडनंरागप्राप्तमेवनिषिध्यते तेनचौलोपन
यनादिषुआधानदर्शपौर्णमासज्योतिष्टोमादिषुनित्यप्राप्तंतीर्थप्रायश्चित्तमातृमरणादौनैमि
त्तिकप्राप्तंचभवत्येव केचित्काम्यनागवल्यादिषुकाम्यमपिभवतीत्याहुः गंगायांभास्करक्षे
त्रेमातापित्रोर्गुरोर्मृतौ आधानेसोमपानेचवपनंसप्तसुस्मृतं गुरोरिति दत्तकस्यपूर्वापरपित्रो
रित्यर्थः वाक्यांतरेतीर्थमात्रेप्युक्तेःगंगाभास्करक्षेत्रग्रहणंजीवत्पितृकस्यतत्रविशेषतःप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रविधानार्थं जीवत्पितृकस्य पिंडदाननिषेधः नांदीश्राद्धतीर्थश्राद्धयोः संन्यस्तादिपितृकस्य दर्शे महा
लयादिश्राद्धेषु च पिंडरहितसांकल्पिकश्राद्धबोधनार्थः महापितृयज्ञे सोमयागे मातृमातामहादे
र्वार्षिकश्राद्धे युगयायामन्वष्टक्यादौ च पिंडदानेभवत्येवेत्युक्तं पिंडदानं प्रकुर्वीत मातापित्रोः क्षये ह
नीति श्राद्धविधिना पिंडदाने सिद्धे पुनः पिंडविधिः पित्रोर्वार्षिके गर्भिणीपतित्वनिषिद्धकालादि
प्रयुक्तनिषेधबोधनार्थं तेन विवाहव्रतचूडासु वर्षमर्धं तदर्धकं पिंडदानं मृदा स्नानं न कुर्यात्तिलत
र्पणमिति निषेधस्यापि बाधः क्षयाहग्रहणं सपिंडीकरणमासिकेष्वपि पिंडविधानोपलक्षणपरं॥
अथ प्रेतकर्मप्रतिप्रसवः जीवत्पितृकः स्वमातुरपुत्रसापत्नमातुः स्वपुत्रसपत्नीपुत्ररहितभार्याया
अपुत्रपितृव्यस्यापुत्रमातामहमातामह्योश्च दाहादिप्रेतकर्माणि कुर्यात् अत्रापुत्रपदेन मुख्यगौणपुत्र
पौत्रप्रपौत्राभावो विवक्षितः मातुरौर्ध्वदेहिकमनुपनीतोपि जीवत्पितृकः कुर्यात् तत्र विशेषः अन
त्रिवर्षः चूडारहितश्चेद्दाहमात्रं समंत्रकं कृत्वान्यदन्येन कारयेत् यदा तु कृतचूडः पूर्णत्रिवर्षो वा तदा स
र्वं समंत्रकं प्रेतकर्म कुर्यात् ब्रह्मचारी तु पित्रोर्मातामहस्य चांत्यकर्म कुर्यान्नान्यस्य भर्तृदौहित्रयोः
सत्वे भर्तैव पत्न्या दाहादि कुर्यात् मुंडनं तु भर्तुर्न एवमपुत्रस्य पत्नीदौहित्रयोः सत्वे पत्न्येव पत्युः कुर्या
त् तत्र दाहमात्रं समंत्रकं स्वेनान्यत्सांकल्पमात्रं स्वयं विधाय ब्राह्मणद्वारा कारयेत् भर्तृ
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४

सपत्नीपुत्रयोः सत्वेसापत्नपुत्र एव कुर्यान्नभर्ता। सपत्नीपुत्रदौहित्रयोः सत्वेसपत्नीपुत्र एव अपुत्रयोर्वि
धवाविधुरयोर्भ्रातृपुत्रदौहित्रयोः सत्वे भ्रातृपुत्र एवाधिकारीतिबहवः विधवायाः भर्तृभ्रातृपुत्र
एव विधुरस्यस्वभ्रातृपुत्र एवेति जीवत्पितृकनिर्णये भट्टाः अपुत्रस्य पत्नीभ्रातृपुत्रयोः सत्वे पत्न्ये
व एवं पुत्रासन्निधौ पौत्रादेः पितामह पितामह्याद्यौर्ध्वदेहिकाद्यधिकारः इत्थं पितृकर्ममुंडनप्रेतक
र्माद्यधिकारानधिकारौ जीवत्पितृकस्य प्रपंचितौ अत्र विषये भेदाद्बालबोधार्थत्वाच्च पुनरुक्तिर्नातिदो
षाय सपिंडानां सगोत्रसंपिंडमरणे सहकृत्सहकृत्तिलांजलिदानं विहितं तज्जीवत्पितृकेणापिकार्यं एवं
मात्तामाहाचार्यादिभ्योपि इति जीवत्पितृकनिर्णयः अथ श्राद्धाद्यधिकारिनिर्णयः तत्र सांव
त्सरिकादिश्राद्धेषु दाहाद्यौर्ध्वदेहिकक्रियायां चौरसपुत्रो मुख्योधिकारी। और सपुत्राणां बहुत्वेज्ये
ष्ठ एवाधिकारी ज्येष्ठस्याभावे सन्निधाने वा पातित्यादिनाधिकाराभावे वा ज्येष्ठानुजः यत्तु ज्येष्ठास
न्निधौ संवर्त्तः कनिष्टोकारी न तु मध्यम इति तन्निर्मूलं तत्र पुत्राणां विभक्तत्वे कनिष्टेभ्योधनं गृहीत्वा
ज्येष्ठेनैव सपिंडीकरणांता क्रिया कार्या। सांवत्सरिकादिकं तु पृथक् पृथक् अविभक्तत्वे तु सांवत्सरिकादि
कमप्येकेनैव कार्यं। एकेन कृतेपि सर्वेषां फलभागित्वात् सर्वैः पुत्रैर्ब्रह्मचर्यपरान्नवर्जनादयो नियमाः कार्याः
पुत्राणामेकदेशस्थित्यभावे देशांतरेगृहांतरे वा स्थितैर्विभक्तैरपि पृथगेव वार्षिकादिकं कार्यं। तत्र यदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्येष्टासन्निधौकनिष्टोदाहादिकंकरोतितदाषोडशश्राद्धांतमेवकुर्यान्नसपिंडीकरणं वर्षपर्यंतंज्येष्टप्रतीक्षांकु
र्यात् तन्मध्येज्ञातेज्येष्टेनैवकार्यं नोचेद्वर्षांतेकनिष्टेनापिकार्यं वर्षात्प्राक्पुत्रभिन्नेनकृतमपिमासिकानुमा
सिकसपिंडीकरणंपुत्रेणपुनःकार्यं एवंकनिष्टेनकृतमपिज्येष्टपुत्रेणपुनःकार्यं विशेषस्त्वग्रेवक्ष्यते कनि
ष्टस्यसाग्निकत्वेसपिंडिकरणामपिद्वादशेह्निकनिष्टेनकार्यं। औरसपुत्राभावेपुत्रिकासुतक्षेत्रजादयोद्वाद
शविधाःपुत्राउक्तास्तथापिकलौतेषांपुत्राणांनिषेधादौरसपुत्राभावेदत्तकएवाधिकारी मातापितृभ्यामन्य
तरेणवाविधिपूर्वंदत्तःप्रतिग्रहीतसवर्णोदत्तकः।भार्यानुमत्यापत्युःपुत्रदातृत्वंतदप्यापदि।अत्यंतापदि
भार्यानुमत्यभावेपि।पत्न्याःपत्यनुमत्यैव।अत्रविशेषविचारःप्रागुक्तः।दत्तकाभावेपौत्रः।पौत्राभावेप्रपौत्रः।
अन्येतुऔरसाभावेपौत्रः।तदभावेप्रपौत्रः।प्रपौत्राभावेदत्तकइत्याहुः।उपनीतपौत्रसत्वेप्यनुपनीतऔर
सपुत्रस्यैवाधिकारः।स्वकृतचूडस्यैवचवर्षाधिकवयसःपूर्णत्रिवर्षस्यत्वकृतचूडस्यापि।अनुपनीतेनापिमं
त्रपाठपूर्वकमेवपित्रोरौर्ध्वदेहिकंसांवत्सरिकादिकंश्राद्धंचकार्यं।अशक्तौलग्निदानमात्रंसमंत्रकम
नुपनीतेनकार्यं अन्यत्तुअन्यद्वारा एवंश्राद्धदर्शमहालयादौसंकल्पमात्रंकार्यं अन्यद्वित्तरेण।
केचित्तुनत्रिवर्षेणचूडारहितेनापिदाहमात्रंसमंत्रंकार्यंशेषमन्येनेत्याहुः।दत्तकस्तुउपनीतएवा
धिकारी।दत्तकाभावेप्रपौत्राभावेचभर्तुःपत्नीपत्न्याःभर्ताचदाहादौर्ध्वदेहिकंसांवत्सरिकश्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ ध्यादिकं च कुर्यात् भर्तुरपि सपत्नीपुत्र सत्वेऽधिकारात् विद्ध्यादौरसः पुत्रोजनन्या और्ध्वदेहिकं॥
तदभावे सपत्नीजरसुतः। भार्ययापि समंत्रकमेवौर्ध्वदेहिकादिकं कार्यं। अशक्तौतु अग्निदानमात्रं
समंत्रकं कृत्वा शेषमन्येन कार्यं। श्राद्धे संकल्पमात्रं कृत्वा शेषमन्येन यद्यपि अविभक्तस्य संसृष्टस्य वा
भ्रातुरेव धनग्रहाधिकारस्तथापि क्रियाधिकारः पत्न्या एव विभक्तासंसृष्टेसुभ्रातरि धनाधि
कारोपि पत्न्या एव। पत्न्यभावे विभक्तासंसृष्टस्य कन्या पिंडदा धनहारिणी च। तत्रापि विवाहिते
व पिंडदा। धनहारा तु अनूढापि। दुहितुरभावे दौहित्रो धनहारी पिंडदश्च। दौहित्राभावे भ्राता
भ्रातुरभावे भ्रातृपुत्रः। अविभक्तस्य संसृष्टस्य च पत्न्यभावे भ्राता। संसृष्टो नाम पूर्वं विभक्तो भू
त्वा पुनः स्वधनं भ्रातृधनैरेकीकृत्यैकपाकादुपजीवनं। तत्र सोदरासोदरसमवाये सोदर एव। तत्रा
पि ज्येष्ठकनिष्ठयोः सत्वे कनिष्ठ एव। कनिष्ठभ्रातुरभावे ज्येष्ठभ्रातैव। कनिष्ठबहुत्वे मृतानंतरस्तद
भावे तदनंतरादयः एवं ज्येष्ठबहुत्वे मृतानंतरक्रमेणैव। सोदरभ्रातुरभावे सापत्नभ्राता। अत्रापि ज्ये
ष्ठत्वादिविचारः पूर्ववदेव। केचित्तु दुहितृदौहित्रयोर्धनहारित्वेपि विभक्तासंसृष्टस्य दाहादिकं भ्रा
त्रैव कार्यं। सगोत्रसद्भावे भिन्नगोत्रस्य तदनधिकारित्वादित्याहुः। भ्रातुरभावे भ्रातृपुत्रः। तत्रापि
सोदरभ्रातृपुत्रो मुख्यः। तदभावे सापत्नभ्रातृपुत्रः। तदभावे पिता। पितुरभावे माता। मात्रभावे ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नुषा। तदभावे भगिनी। तत्रानुजाग्रजसोदराणां समवाये भ्रातृवत्। भगिन्यभावे भगिनीपुत्रः
समवाये तद्वदेव। तदभावे पितृव्यतत्पुत्रादयः सपिंडाः तदभावे सोदकाः। तदभावे मातामहमातु
लतत्पुत्रादयो मातृसपिंडा अनुक्रमेण। मातृसपिंडाभावे स्वपितृष्वसृमातृष्वसृमातुलपित्रेक
पाः पितृबंधवाः। एवं मातुः पितृष्वसादिपुत्ररूपमातृबंधवः। पितृबंधूनामभावे अधिकारिणः तद
भावे शिष्यः। शिष्याभावे जामाता श्वशुरस्य। श्वशुरो जामातुः तदभावे सखा। तदभावे विप्रस्य क
श्चिद्धनहारी। विप्रभिन्नस्य राजा धनं गृहीत्वा तेन धनेनान्यद्वारा कारणीयं। अथवा विप्रादेर्मर
णोन्मुखैर्धर्मपुत्रः कार्यः॥ अथ स्त्रीणां दाहाद्यधिकारिणः। अनूढायाः स्त्रियाः पिता। तदभा
वे भ्रात्रादिः। ऊढायास्तु पुत्राभावे सपत्नीपुत्रः तदभावे पौत्रप्रपौत्राः। तदभावे पतिः। तदभावे
दुहिता। तदभावे दौहित्रः। तदभावे पत्युर्भ्राता। तदभावे पत्युर्भ्रातृपुत्रः। तदभावे स्नुषा। तद
भावे पिता। पितुरभावे भ्राता। तदभावे भ्रातृपुत्रादयः पूर्वोक्ताः। अत्र सर्वत्र पुत्रभिन्नानां पुत्रासन्नि
धानात्पुत्राभावाद्वा कर्तृत्वमिति निश्चितं॥ तत्र यदि पुत्रासन्निधानात्कर्तृत्वं तदा पुत्रभिन्नैर्दाहमार
भ्य सपिंडीकरणात्प्राचीनकर्मैव कार्यं। न तु पुत्रभिन्नैः सपिंडीकरणं कार्यं। पुत्राभावे तु अन्यैः सपि
डीकरणमपि कार्यं। तत्रापि सपिंडादिभिन्नैः पांतैर्दाहमारभ्य दशाहक्रियाः कार्या एव। ता एव पूर्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ इत्युच्यंते। ततषकादशाहमारभ्य सपिंडीकरणांतांमध्यमसंज्ञाः तासुसपिंडादीनां कृताकृत
त्वं। तदूर्ध्वाअनुमासिकसांवत्सरिकाद्यास्ताउत्तराख्याः सपिंडादिभिर्नकार्याएव। इदंच तदीयधना
दिरूक्थावर धनस्यचरधनस्यवाग्रहणाभावेतदन्यत्तरधनग्रहणेतु सपिंडादिभिरपिमध्यमोत्तरा
ख्या अपिक्रियाः कार्याएव। राज्ञातुमृतधनसत्वेतद्धनद्वारा तत्सजातीयवर्णहस्तेन सर्वा अपि
क्रियाः कारणीयाएव। धनाभावेतुपूर्वोत्ताएवावश्यंकारणीयानान्याः। सपिंडादिनृसांतभिन्ना
नांतुमृतस्यधनाभावेपिस्वधनेनैवसपिंडीकरणांतक्रियाकरणमावश्यकं। मृतस्यधनंगृहीत्वा
प्रेतकार्याकरणेन्येषांतानांतद्दंर्णवधप्रायश्चित्तं। पुत्राद्यैर्भ्रातृसंततिसंततैर्दौहित्रैश्च तत्पुत्रैश्च।
त्रिविधाअपिक्रियाधनग्रहणसत्वेतदसत्वेचापिकार्याएव। तत्रस्त्रीणामन्तराः क्रियामृताहन्येव।
नतुदर्शादौभर्तृश्राद्धेनैवनिर्वाहस्मृतेः। पूर्वमध्यमाख्यास्तुपृथगेवस्त्रीणां। केचित्तुत्रपत्यो
रभावेस्त्रीणांदौहित्रादिभिः सपिंडीकरणरहिताएवोत्तराः क्रियाः कार्याः। सपिंडीकरणंतु
तासांनकार्यं। सपिंडीकरणाभावेपिएकोद्दिष्टविधिनावार्षिकादिकंकार्यमित्याहुः। ब्राह्म
णस्त्वन्यवर्णानांनकुर्यात्कर्मपैतृकं। कामाल्लोभाद्भयान्मोहात्कृत्वा तज्जातितांव्रजेत्। शूद्रे
णापिब्राह्मणस्यनेकार्यंपैतृकंक्वचित्। दत्तकस्तुजनकपितुः पुत्राद्यभावेजनकपितुः श्रा ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं कुर्यात् धनंच गृह्णीयात् जनकपालकयोरुभयोः पित्रोः संतत्यभावे दत्तको जनकपालकयोरु
भयोरपि धनं हरेत्। श्राद्धं च प्रत्तिवार्षिकमुभयोः कुर्यात्। दर्शमहालयादौ तु द्वयोः पित्रोर्द्वयोः श्राद्धं
देयं। तत्र द्वयोः पित्राद्योः पृथक् पिंडदानं। पित्रादिद्वयोद्देशेनैकैकोवापिंडः। एवं दत्तकस्य पुत्रः
दत्तकजनकस्यपुत्राद्यभावे स्वपितरं पितामहद्वयं प्रपितामहद्वयंचोद्दिश्यदर्शादिकं कुर्यात्। तथैव
धनं हरेत्। एवं दत्तकपौत्रोपि तज्जनककुले प्रपितामहस्यपुत्राद्यभावे पितरं पितामहं चैकैकमु
द्दिश्य प्रपितामहद्वयमुद्दिश्य दर्शादिश्राद्धं कुर्यात् प्रपितामहस्य धनंच हरेत्। यद्येषां स्यासु भा
र्यास्त्वपत्यं नस्यादिक्थं हरेयुः पिंडं चैभ्यस्त्रिपुरुषं दद्युरित्यादेरेकपिंडेष्वावत्तु कीर्तयेत् गृहीतारं चो
त्पादयितारं चात् सीयात् पुरुषादित्यादेश्च लौगाक्ष्यादिस्मृतिवचनात्। यदि जनकपालकयोरुभयो
रपिपुत्रादिसंततिसत्वं दत्तक उभयोरप्यौर्ध्वदेहिकं वार्षिकादिकं च कुर्यात्। पालकपितुरौरसपुत्रा
द्विभक्तेन दत्तकेन दर्शमहालयादिश्राद्धमात्रं पालकपित्रादिपार्वणोद्देशेन कार्यं। अविभक्तस्य
तु तदौरसकृतदर्शादिनैव दत्तकस्य दर्शादिसिद्धिरिति भाति। ब्रह्मचारिणामासिकादिका
दिश्राद्धं मातापित्रोर्भिः कार्यं। ब्रह्मचारिणा तु मातृपितृमातामहोपाध्यायाचार्यभिन्नानां
शवनिर्हरणंदाहाद्यंत्यकर्म च न कार्यं। अन्याधिकार्यभावे मातृपितृमातामहाचार्याणां दा

८ तारिकं ब्रह्मचारिणा कार्यं। तत्र दशाहकर्मकरणे दशाहमाशौचं। दाहमात्रकरणे एकाहं। तत्र दाप्यस्य
नित्यकर्मलोपो नास्ति। अशुचित्वेपि आशौचिनामन्नं तेन न भोक्तव्यं। तैः सह न वस्तव्यं। तदुभय
करणे प्रायश्चित्तं पुनरुपनयनं वक्ष्यते। अन्येषां दाहादौ कृच्छ्रत्रयं पुनरुपनयनं च। अधर्मार्थं केन चि
त्कस्यचित्सवर्णस्य दाहादिश्राद्धादिकरणे संपत्त्यादिफलं। अयं सर्वोपि श्राद्धविधिः। शूद्राणाममं
त्रकः कार्यः। अत्र केचित् वैदिकमंत्रपाठ एव शूद्राणां वर्ज्यः। पौराणमंत्रास्तु पठनीया इत्याहुः। पौराणमंत्रा
अपि शूद्रेण स्वयं न पठनीयाः किंतु विप्रद्वारा पाठनीयाः। वेदमंत्रास्तु न विप्रद्वारापीति सिंधुः। एवं
ये द्विजस्त्रियोपि व्रात्यो व्यापन्ना दाविवसंकल्पमात्रं स्वयं कृत्वा वैदिकमंत्रादिप्रयुक्तं सर्वं श्राद्धं विप्रद्वारा
कारयेत् पुरिति पारिजातकारमतं। शूद्रस्य सदाम श्राद्धमेव। पित्रे नमः पितामहाय नमः इत्येवमादिना
नमोंतनाममंत्रेण अभिमंत्रण पाद्यासनगंधपुष्पादिना विप्रान् संपूज्यामं निवेद्य सक्तुना पिंडदानादि
कृत्वा दक्षिणादानादिना श्राद्धं समाप्य सजातीयान् गृहसिद्धपक्वान्नेन भोजयेत्। यत्तु सिंधौ
नाममंत्रेणावाहनाग्नौकरणकाश्यपगोत्रोच्चारपूर्वकं पिंडदानादिकं पाकेन पिंडदानादिकं चो
क्तं तत्स्वक्तृविषयं। सत्पुरुषं त्रिपुरुषं वा परंपरया स्नानवैश्वदेवतर्पणादिकं शूद्रकमलाकरादि
ग्रंथसंगृहीतं धर्मं नियमेनाचरन् सच्छूद्र उच्यते। एवं किरातयवनादिहीनजातीयानां विप्रेभ्य आ ८

मदानदक्षिणादानपूर्वकं स्वस्वजातीयभोजनात्मकमेव श्राद्धं। राजकार्ये नियुक्तस्य बंधनिग्रहवर्तिनः
व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेत्॥ अत्र प्रथमं जीवत्पितृक निर्णय उक्तस्तत्र प्रसंगात्किंचिद
धिकारविचारोप्युक्तः॥ इदानीं तु सर्वोप्यधिकारक्रमविचारः सविस्तर उक्त इति तेनात्र पुनरुक्तिर्बाल
बोधार्थं चात्र शेषाय॥ ॥इति श्रीमदनंतोपाध्यायसूनुविरचिते धर्मसिंधुसारे श्राद्धाधिकारदाहा
द्यधिकारनिर्णयः॥ ॥अथ श्राद्धशब्दार्थः॥ पित्रादीन्मृतानुद्दिश्य विहिते काले देशे पक्वान्नामान्नहि
रण्यान्यतमद्रव्यस्य विधिना दानं श्राद्धं॥ तत्राग्नौकरणं पिंडदानं ब्राह्मणभोजनं च प्रधानं। तदुक्तं हो
मश्च पिंडदानं च तथा ब्राह्मणभोजनं। श्राद्धशब्दाभिधेयं स्यादेकस्मिन्नौपचारिक इति। केचिद्वचनाद्दर्श
त्याचा पिंडदानाद्यकरणे ब्राह्मणभोजनादिमात्रमपि श्राद्धपदार्थः संपद्यत इति चतुर्थपादार्थः। तथा
च वचनांतरं। यजुषां पिंडदानं तु बह्वृचानां द्विजार्चनं। श्राद्धशब्दाभिधेयं स्यादुभयं सामवेदिनां। अश्र
द्धयापितरो न संतीति श्रुत्या श्राद्धमकुर्वाणस्य रक्तं पितरः पिबंति॥ अथ श्राद्धभेदाः॥ तत्र श्राद्धं चतुर्वि
धं॥ पार्वणश्राद्धमेकोद्दिष्टश्राद्धं नांदीश्राद्धं सपिंडीकरणश्राद्धं चेति भेदात्। पित्रादित्रयोद्देशेन विहि
तं पिंडत्रययुक्तं पार्वणं। तच्चैकपार्वणकद्विपार्वणकत्रिपार्वणकमिति त्रिविधं। तत्र पित्रादेर्मृततिथौ क्रि
यमाणं प्रतिसांवत्सरिकमेकपार्वणकं। अमावास्यादिषण्णवतिश्राद्धनियमश्राद्धानि महालयान्वष्टक्यभि
धानि द्विपार्वणकानि। एतेषु सपत्नीकपित्रादित्रयसपत्नीकमातामहादित्रययोरेवोद्देशात्। अन्वष्टकाश्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८ षं त्रिपार्वणाकं । पित्रादित्रयमात्रादित्रयसपत्नीकमातामहादित्रयपार्वणासुद्देशात् । महालयश्राद्धं
तीर्थश्राद्धं च पार्वणैकोद्दिष्टरूपं । पित्रादिपार्वणत्रयस्य पत्न्याद्येकोद्दिष्टगणस्य चोद्देशात् । केचि
देतद्रूपं मातामहमातामह्योः पार्वणभेदेन पार्वणचतुष्टययुतं कुर्वन्ति । केचांचित्तत्रेदर्शी पित्रिपार्वणाक
श्चतुःपार्वणकोवेत्ति हेमाद्रौ एकोद्देशेन क्रियमाणमेकपिंडयुतमेकोद्दिष्टं । तदपि त्रिविधं । नवसंज्ञं नव
मिश्रसंज्ञं पुराणसंज्ञं चेति । मृतस्य प्रथमदिनमारभ्य दशाहांत विहितानि नवसंज्ञानि । एकादशाहादी
नि ऊनाब्दांतानि नवमिश्राणि । एतानि विश्वेदेवहीनानि । ततः पराणि केनिष्ठभ्रातचार्षिकश्रोत्रेहत
चतुर्दशीश्राद्धादीनि पुराणसंज्ञानि । केचित्सपिंड्युत्तरं क्रियमाणानां पार्वणानामपि पुराणसंज्ञामाहुः ।
इदं पूर्वार्धे विस्तरेण प्रपंचितं । तद्देवगर्भाधानपुंसवनसीमंतेषु आधाने सोमे च क्रियमाणं कर्मांगमिष्टि
श्राद्धमिति चोच्यते । अत्र क्रतुदक्षौ विश्वेदेवौ । अन्यकर्मसु वृद्धिसंज्ञं तत्र सत्यवसू विश्वेदेवाः इति नामभे
दो देवभेदश्चान्यत्समानं । एतच्च पार्वणत्रययुतं हात्पार्वणभेदांतर्गतमपि दर्शादितो बहुधर्मभेदात्पृथगु
द्दिष्टं । मृतस्य द्वादशाहादिकाले पिंडार्घसंयोजनादिरूपं सपिंडीकरणं । एतदपि पार्वणैकोद्दिष्टविकाररू
पं । अत्र विशेषो वक्ष्यते । एवं च पार्वणमेकोद्दिष्टमिति द्विविधमेव श्राद्धं । एतत्पुनस्त्रिविधं । नित्यं नैमित्ति
कं काम्यं चेति । नियतनिमित्ते विहितं नित्यं । यथा दर्शादि । प्रत्यहं विहितमपि श्राद्धं नित्यसंज्ञं पार्वणद्वय
युतं विश्वेदेवहीनमुक्तं । अनियतनिमित्ते विहितं नैमित्तिकं । यथा सूर्यचंद्रग्रहणादौ । एतदपि षड्दैवतं । ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलकामेनोपाधिकंकाम्यं।यथापंचम्यादितिथौह्लत्तिकादिनक्षत्रेच॥ अथश्राद्धदेशाः॥दक्षिणाप्रवणे
गोमयेोपलिसेह्लमिकेशास्थिश्लेष्मादिवर्जितेह्लत्रिमभूमिवर्जितेरजस्वलादर्शनादिवर्जितेश्राद्धं
कार्यं।कुरुक्षेत्रप्रभासपुष्करप्रयागकाशीगंगायमुनानर्मदादित्तीरेनैमिषगंगाद्वारगयाशीर्षाक्षय्यव
टादिषुश्राद्धंमहाफलं।शमीपत्रप्रमाणेनपिंडंदद्याद्गयाशिरे।उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतं।
पितामाताचभार्याचभगिनीदुहितातथा।पितृमातृष्वसाचैवसप्तगोत्राणिवैविदुः॥एषांगोत्राणांपुरु
षाः।क्रमेणचतुर्विंशतिषोडशद्वादशैकादशदशाष्टाविंशत्येकोत्तरशतसंख्यास्तेषामुद्धारइत्यर्थः।तत्रपि
धिः।चक्रांकितस्यसान्निध्यमेषुपक्षिप्यतेनरैः॥स्नानंदानंतपःश्राद्धंसर्वमक्षय्यतांव्रजेत्।गजाश्वादि
दृष्टप्रदेशोम्लेंछदेशेचश्राद्धंनकार्यंपरकीयगृहादौश्राद्धकरणेतद्भूमिस्वामिपितरोभागंहरंति।तेनगृ
हस्वामिनेमूल्यंदत्वाकार्यं।स्वाम्यनुज्ञयावाकार्यं।वनानिगिरयोनद्यास्तीराण्यायतनानिच।देवखा
ताश्चगर्ताश्चनस्वाम्यंतेषुकस्यचित्।नैवश्वासानचद्वीपेनांतरिक्षेकदाचन।श्रुतिस्मृत्युदितंकर्मनकुर्या
दशुचिःक्वचित्॥अथश्राद्धकालाः॥तेचप्रायेणामासंक्रांतियुगादिमहालयादयः।पूर्वंपरिछेदउ
क्ताएववाकेचिदुच्यंते महातीर्थप्राप्तिर्व्यतीपातोमृताहोग्रहणद्वयंश्राद्धंप्रतिरुचिःश्रोत्रियादिब्राह्म
णसंपत्तिरर्घोदयकपिलाषष्ठ्यादयस्तथाभ्ययोगाग्रहपीडादुःस्वप्नदर्शनंनवान्नप्राप्तिर्नवोदकप्राप्तिर्गृह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ म्रष्णा१नादि निमित्तं चश्राद्धकालाः। यदा विष्टिर्व्यतीपातो भानुवारस्तथैवच। पद्मकोनामयोगोयमय
नादेश्चतुर्गुणः। सर्वमासानां कृष्णपक्षेषु श्राद्धमुक्तं। अत्रमत्स्यहं पंचम्यादिर्वीयदहः संपत्तिर्वैतित्रयः
पक्षाः। एकदिनपक्षे दर्श एव। नारायणवृत्तौतु दर्शश्राद्धेनैव पक्षश्राद्धसिद्धिरुक्ता। सर्वमासेषु दर्शश्रा
द्धाशक्तौ कन्यार्कं भद्रपदस्थेर्के सति दर्शत्रये एकत्र दर्शेवा श्राद्धं साग्निकस्य त्वशक्तस्य पिंडपितृयज्ञमात्रे
णदर्शसिद्धिः। निरग्निकस्य ब्राह्मणभोजनमात्रेण धान्यादि द्रव्यदानेनवा दर्शसिद्धिः। कृष्णपक्षेषु महा
लयापरपक्षस्य श्रेष्ठत्वं। तथापि पंचदशाहादिपक्षा अन्योपि बहुविस्तरो द्वितीयपरिच्छेदे उक्तः। अत्रवि
शेषांतरं कालतत्वविवेचने॥ पंचदशाहस्यापि महालयप्रयोगारंभोत्तरमाशौचपाते सत महालयानां वै
कल्यं। तेनशुद्धेनेतैकस्यां तिथौ सकलमहालयमात्रमनुष्ठेयं। एवं पंचम्यादिपक्षेपि प्रतिबंधांतरे म
तिनिषिद्धानाशेषमहालयानुष्ठानं पितृव्यज्येष्ठभ्रात्रादीनामपुत्राणां महालयापरपक्षे तत्तन्मृततिथौ
तस्यैकपार्वणकमहालयश्राद्धं जीवत्पितृकेणापि कार्यमिति। दर्शपौर्णमास्यो संभवेमाघीश्रावणीप्रो
ष्ठपद्यो नित्याः। कस्मिंश्चित्कृष्णपक्षे प्रतिपदादि पंचदशतिथिषु हस्तिकादिभरण्यंतनक्षत्रेषु षष्ठं भा ५ वि ४
दियोगेषु सूर्यादिवारेषु बवादि करणेषु च श्राद्धे फलविशेषोक्तेरेते तिथ्यादयः काम्यश्राद्धकालाज्ञेयाः
इतिसामान्यकालाः॥ अथापराह्णादि विशेषनिर्णयः दिनस्य पंचधा विभागास्त्रिमुहूर्तकास्तत्राद्यो
भागः प्रातः संज्ञः। द्वितीयः संगवः तृतीयो मध्याह्नः चतुर्थोपराह्णः। पंचमोभागः सायाह्नः। दिन १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यपंचदशभागोमुहूर्त्तः। तत्रसप्तमोगंधर्वोष्टमोमुहूर्तःकुतुपः नवमोरोहिणः। तत्रदर्शादिश्राद्धानां
निर्णयः। पूर्वपरिछेदयोः प्रायशोक्तः विशेषस्तूच्यते साग्निकानांकात्यायनादीनामन्वाधानपिंड।
पितृयज्ञदर्शश्राद्धानामेव दिनकर्त्तव्यत्वनियमात्रेधाविभक्तदिनतृतीयभागरूपापराण्हव्यापि
न्यामभावांदर्शश्राद्धंकर्त्तव्यं अथप्रतिसांवत्सरिकमासिकादिनिर्णयाउच्यंते तत्रैकोद्दिष्टंमध्यान्हे।
सप्तमाष्टमनवममुहूर्तेकार्यं। तत्रापिकुतुपरौहिणसंज्ञकावष्टमनवममुहूर्तौमुख्यःकालः। तत्रपूर्व
त्रैवपरत्रैववादिनेमध्यान्हव्याप्तौसैवतिथिर्ग्राह्यादिनद्वयेमध्यान्हव्याप्तौमध्यान्हव्याप्तौमध्यान्हस्प
र्शेवापूर्वत्रैव दिनद्वयेसाम्येनैकदेशव्याप्तौपूर्वा खर्वदर्पादिभेदेव्यवस्थेत्यन्ये वैषम्येणैकदेशव्याप्तावधि
क्येननिर्णयः पार्वणंत्वपराण्हव्यापिनीग्राह्या। पूर्वत्रैववापराण्हव्याप्तौसैवग्राह्या दिनद्वयेतद्व्याप्तौ
तदस्पर्शेवांशतःसमव्याप्तौवापूर्वा विषमव्याप्तौत्वधिकाग्राह्यामाधवाचार्यास्तुदिनद्वयेपूर्वापराण्ह
व्याप्तावंशतःसमव्याप्तौचोत्तरतिथेःक्षयेपूर्वावृद्धौपरा। उत्तरतिथेःक्षयवृद्ध्यभावेपूर्वेत्याहुः। अयं
क्षयाहनिर्णयः। प्रत्याब्दिकेमासिकेसहलन्महालयेचज्ञेयः। श्राद्धेभरण्यादिनक्षत्रव्यतीपातादियोग
श्रापराण्हव्यापीयुक्तं। द्वितीयेकिंचिच्छुक्लपक्षेउदयव्यापिनक्षत्रंकृष्णपक्षेस्तमयव्यापि। योगस्तुकु
तुपादिव्यापीत्याहुः एतच्चपार्वणश्राद्धंकुतुपादिमुहूर्तपंचकेकार्यंनसायान्हेनरात्रौनप्रातःसंगवयोः। या २

१०

पिंडपितृयज्ञदिने सायान्हेपि पार्वणमनुज्ञायते यदा विघ्नवशाद्दिने सांवत्सरिकश्राद्धं न कृतं तदा रात्रा
वपि प्रहरपर्यंतं कार्यं मन्त्वाहातिक्रमे चांडालत्वादिदोषोक्तेः ग्रहणदिने दर्शदर्शमासिकप्रतिवार्षिका
दिश्राद्धप्राप्तौ तद्दिने एवान्नेनामेन वा हेम्ना वा कुर्यान्नोत्तरदिने प्रथमाब्दिकं त्रयोदशे मलमासे कार्य
मित्युक्तं तेन यत्र द्वादशमासिकं शुद्धमासे भवति तत्र त्रयोदशेधिक एव प्रथमाब्दिकं कार्यं यदा त
धिकमध्ये द्वादशं मासिकं तदा द्वादशमासिकस्य द्विरावृत्तिं कृत्वा चतुर्दशे शुद्धे मासे प्रथमाब्दिकं ए
वं द्वितीयादिमासिकस्यापि मलमासे प्राप्तस्य द्विरावृत्तिर्ज्ञेया द्वितीयाद्याब्दिकं तु शुद्धमासे एव एवं
महालयोपि शुद्धे एव नाधिके मासि किंचिदपि मलमासमृतानां तु यदा स एव मलमासो भवति तदाधि
क एव सांवत्सरिकं न शुद्धे दर्शदिने वार्षिकप्राप्तौ पूर्वं वार्षिकं कृत्वा ततः पिंडपितृयज्ञं पाकांतरेण दर्शश्रा
द्धं च कुर्यात् परे तु आदौ पिंडपितृयज्ञस्ततो वार्षिकं ततो दर्श इति क्रममाहुः एवं मासिकादिषु पिंडेषु स
पिंडीकरणादूर्ध्वं यावदब्दत्रयं भवेत् तावदेव न भोक्तव्यं तदीये श्राद्धमात्रके प्रथमेब्दे स्थ्यादिभोजी द्वि
तीये मांसभक्षकः तृतीये रक्तभोजी स्याच्छ्राद्धं चतुर्थके इत्यास्तां प्रासंगिकं प्रकृतमनुसरामः या
वर्णामपि हेमश्राद्धमामश्राद्धं च द्वेधा विभक्त दिनपूर्वभागे एव कार्यं सर्वं च श्राद्धं तत्तन्निर्णीतकाले त
त्तत्तिथ्यभावेपि कर्तव्यं साकल्यवचनादिनाद्यास्तत्र तत्तिथिसद्भावादिति कालतत्वविवेचने दृष्टि १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=08.01.20 10:23
,TRANSFERRED=2020/01/08 at 10:26:28
,PAGES=21
,TYPE=STD
,NAME=S0002465
,Book Name=M-2574-KARMKAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection